Roll No. | | | | | | | | |

# DAV PUBLIC SCHOOLS, ODISHA ZONE – I

## TERM-II EXAMINATION (2021-22)

- Please check that this question paper contains **06** printed pages.
- Check that this question paper contains **09** questions.
- Write down the Serial Number of the question in the left side of the margin before attempting it.
- **10** minutes time has been allotted to read this question paper. The question paper will be distributed **10** minutes prior to the commencement of the examination. The students will read the question paper only and will not write any answer on the answer script during this period.

## CLASS - IX
## SUB : SANSKRIT (122)

**Time Allowed: 2 Hours** **Maximum Marks : 40**

**समयः – होराद्वयम्** **सम्पूर्णाङ्काः – 40**

**सामान्यनिर्देशाः-**

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 6 पृष्ठानि मुद्रितानि सन्ति ।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 9 प्रश्नाः सन्ति ।
3. अस्य प्रश्नपत्रस्य पठनाय 10 निमेषाः निर्धारिताः सन्ति । अस्मिन् अवधौ केवलं प्रश्नपत्रं पठनीयम् उत्तरपुस्तिकायां च किमपि न लेखनीयम् ।
4. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः ।
5. प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् एव लेखनीया ।
6. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।
7. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः ।

## अपठितावबोधनम्

**1.अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-** **(10)**

आचारः प्रथमः धर्मः । यथा दर्पणे वयं यथार्थम् एव पश्यामः , तथैव यादृशम् आचरणं वयं कुर्मः , तादृशम् एव प्राप्नुमः । सदाचारेण एव जनाः शान्तिं समृद्धिं च लभन्ते । ये नराः अस्मिन् संसारे आत्महितम् इच्छन्ति ते सदैव सदाचरणम् एव कुर्युः । मानवाः अनेन आचरणेन एव सकलान् जनान् वशीभूतान् कर्तुं समर्थाः भवन्ति । अस्य सदाचारस्य तु मानवजीवने महती आवश्यकता वर्तते । सदाचारेण तु कोऽपि नरः महामानवः भवितुं शक्नोति। अस्माकम् इतिहासे पुराणेषु च सदाचारस्य गुरुत्वं वर्णितम् अस्ति । सदाचारी जन: सर्वदा सम्मानं लभते । छात्रै: तु सर्वथा सदाचार: यथार्थरूपेण पालनीय: इति उपदेश: अतीव गुरुत्वपूर्ण: ।

**(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** **(1×2=2)**

(i) प्रथमः धर्मः कः ?

(ii) कस्य मानवजीवने महती आवश्यकता वर्तते ?

(iii) केन नरः महामानवः भवितुं शक्नोति ?

**(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** **(2×2=4)**

(i) सदाचारेण जनाः किं किं लभन्ते ?

(ii) ये नराः संसारे आत्महितम् इच्छन्ति ते किं कुर्युः ?

(iii) मानवाः कथं सकलान् जनान् वशीभूतान् कर्तुं समर्थाः भवन्ति ?

**(इ) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत -** **(1)**

**(ई) यथानिर्देशम् उत्तरत - (केवलं प्रश्नत्रयम्)** **(1×3=3)**

(i) ' पश्यामः ' इति क्रियापदस्य कर्तृपदं किम् ?

(ii) 'मानवा:' इति पदस्य कः पर्यायः अत्र प्रदत्त:?

(iii) 'अधर्म:' इति पदस्य कः विलोमः अत्र आगत:?

(iv) 'सकलान्' इति पदस्य विशेष्यं गद्यांशात् चित्वा लिखत ।

## रचनात्मककार्यम्

**2. स्वविद्यालयस्य वर्णनं कुर्वन्तः मित्रं प्रति लिखिते अस्मिन् पत्रे रिक्तस्थानानि मञ्जूषायां प्रदत्तपदानां सहायतया पूरयत-** **(½ x 10= 5)**

परीक्षाभवनम्

तिथिः .......................

प्रिय (i) .................. !

(ii) ..................।

भवतः पत्रं ह्यः एव प्राप्तम्। अहम् अधुना स्वविद्यालयस्य वर्णनं कर्तुम् इच्छामि। मम (iii)...........अतीव (iv) ......... अस्ति। मम विद्यालये विशालं (v) .............. समृद्धाः प्रयोगशालाः, सुन्दरः (vi) ............ च सन्ति। उपप्रधानाचार्यः अतीव कर्मठः (vii) .........च अस्ति। अस्माकम् (viii).......... मनोयोगेन पाठयन्ति। सर्वे छात्राः अपि योग्याः सन्ति। विस्तरेण पुनः (ix) ...............।


तव (x) ..................

प्रशान्तः

**मञ्जूषा**

| |
|---|
| नमस्ते,क्रीडाक्षेत्रं,मित्रम्,विद्यालयः,शोभनः,लेखिष्यामि,सद्-व्यवहारशीलः,मित्र,अध्यापकाः,पुस्तकालयः |

**3.अधःप्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चवाक्यानि संस्कृतेन लिखत-(1x5=5)**



**मञ्जूषा**

| |
|---|
| **नयति, हंसौ , खगाः , क्षालयति , सरोवरः , नारिकेलवृक्षाः , आकाशे , कुमुदपुष्पाणि , जलम् , परिवेशः** |

**अथवा**

**मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत-** **(1x5=5)**

**"प्रातः भ्रमणम्"**

**मञ्जूषा**

| |
|---|
| **जीवने , सूर्योदयः , आनन्दम् , जनानां , स्नेहम् , समयम् , जनाः , स्वास्थ्यबर्धकम् , खगाः , वृक्षाः** |

**4.अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत-(केवलं वाक्यपञ्चकम्)** **(1x5=5)**

**i.** गाँव के चारों ओर पेड़ हैं।

Trees are all around the village.

**ii.** तुम पत्रिका कब पढ़ोगे?

When will you read magazine?

**iii.** सुनीता प्रतिदिन मंदिर जाती है।

Sunita goes to temple everyday.

**iv.** हमें हमेशा सच बोलना चाहिए ।

We should always speak truth.

**v.** पक्षी पेड़ पर बैठे हैं ।

Birds are sitting on the tree.

**vi.** तुम्हारी माता का नाम बताओ।

Tell your mother's name.

**vii.** छात्र लिख रहा था ।

Student was writing.

## पठित-अवबोधनम्

**5.अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-** **(3)**

धर्मो रक्षति रक्षितः इत्यार्षवचनम् । पर्यावरणरक्षणमपि धर्मस्यैवाङ्गमिति ऋषयः प्रतिपादितवन्तः । अत एव वापीकूपतडागादिनिर्माणं देवायतन-विश्रामगृहादिस्थापनञ्च धर्मसिद्धेः स्रोतो रूपेण अङ्गीकृतम् । कुक्कुर-सूकर-सर्प-नकुलादि-स्थलचराः मत्स्य-कच्छप-मकरप्रभृतयः जलचराश्च अपि रक्षणीयाः , यतः ते स्थलमलानाम् अपनोदिनः जलमलानाम् अपहारिणश्च । प्रकृतिरक्षया एव लोकरक्षा सम्भवति इत्यत्र नास्ति संशयः।

**(अ) एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्)** **(½ x 2= 1)**

**(i)** कः रक्षति ?

**(ii)** पर्यावरणरक्षणं कस्य अङ्गम् इति ?

**(iii)** लोकरक्षा कथं सम्भवति ?

**(आ)** पूर्णवाक्येन उत्तरत- **(केवलं प्रश्नद्वयम्)** **(1×2=2)**

**(i)** आर्षवचनं किम् ?

**(iii)** ऋषयः किं प्रतिपादितवन्तः?

**(iii)** स्थलमलानाम् अपनोदिनः के ?

**6.अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-** **(3)**

तं शब्दमवसुप्तस्तु जटायुरथ शुश्रुवे।
निरीक्ष्य रावणं क्षिप्रं वैदेहीं च ददर्श सः॥

**(अ)एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्)** **(½ x2=1)**

**(i)** कः अवसुप्तः आसीत् ?

**(ii)** जटायुः कं शुश्रुवे ?

**(iii)** वैदेहीं कः ददर्श ?

**(आ)पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम् )** **(1×2=2)**

**(i)** जटायुः कं निरीक्ष्य वैदेहीं ददर्श ?

**(ii)** कीदृशः जटायुः शब्दं शुश्रुवे ?

**(iii)** जटायुः रावणं कथं निरीक्षणम् अकरोत् ?

**7.अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-** **(3)**

**पुरुषः**-भोस्तपस्विन्! कथं माम् अवरोधं करोषि । प्रयत्नेन किं न सिद्धं भवति? कावश्यकता शिलानाम्? सिकताभिरेव सेतुं करिष्यामि स्वसंकल्पदृढतया।

**तपोदत्तः**-आश्चर्यम्! किं सिकताभिरेव सेतुं करिष्यसि ? सिकता जलप्रवाहे स्थास्यन्ति किम्? भवता चिन्तितं न वा?

**पुरुषः**- (सोत्प्रासम्) चिन्तितं चिन्तितम्। सम्यक् चिन्तितम्। नाहं सोपानसहायतया अधिरोढुं विश्वसिमि। समुत्प्लुत्यैव गन्तुं क्षमोऽस्मि ।

**तपोदत्तः**- (सव्यङ्ग्यम्) साधु साधु! आञ्जनेयमप्यतिक्रामसि !

**(अ) एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्)** **(½ x 2= 1)**

**(i)** सर्वं कार्यं केन सिद्धं भवति ?

**(ii)** सिकता कुत्र न स्थास्यन्ति?

**(iii)** भोस्तपस्विन् ! – इति कः वदति ?

**(आ) पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्)** **(1×2=2)**

**(i)** पुरुषः कस्मिन् न विश्वसिति ?

**(ii)** पुरुषः कथं गन्तुं क्षमः अस्ति ?

**(iii)** तपोदत्तः सव्यङ्ग्यं पुरुषं किं वदति ?

**8. मञ्जूषातः उचितं पदं चित्वा अघोलिखितश्लोकस्य अन्वयं पूरयत-** **(½ x 4= 2)**

रामो बबन्ध यं सेतुं शिलाभिर्मकरालये।
विदधद् बालुकाभिस्तं यासि त्वमतिरामताम्।।

**अन्वयः**-रामः मकरालये (i)..........यं सेतुं (ii)..........त्वं बालुकाभिः (iii)..........विदधद् (iv)......यासि ।

**मञ्जूषा-** तं, बबन्ध, अतिरामतां, शिलाभिः

**अथवा**

**मञ्जूषातः उचितं पदं चित्वा अघोलिखितश्लोकस्य भावार्थं पूरयत-** **(½ x 4= 2)**

निवर्तय मतिं नीचां परदाराभिमर्शनात् ।
न तत्समाचरेद्धीरो यत्परोऽस्य विगर्हयेत् ।।

**भावार्थः**- हे विद्वन् रावण ! त्वं परेषां स्त्रीहरणं रूपं (i) ------स्वदुर्मतिं निवर्तय, यतः(ii)------जनाः ईदृशीं (iii)------ न कुर्वन्तु येषां कारणेन तेषां कीर्तिः नश्येत् यतः (iv)----- एव अस्मिन् जगति जनानाम् अभिनन्दनस्य कारणं भवति ।

**मञ्जूषा-** अपकीर्तिं, पापात्, पुण्यकर्म, धैर्यवन्तः

9. अधोलिखितवाक्यानि घटनाक्रमानुसारं संयोज्य पुनर्लिखत- **(½ x 8= 4)**

**(i)** उद्याने सः विविध-प्रकारान् जीवान् क्रीड़नाय आह्वानम् अकरोत् ।

**(ii)** तदनन्तरं सः बालः विद्याग्रहणाय सत्वरं पाठशालाम् अगच्छत् ।

**(iii)** तदा सः स्वकर्त्तव्यस्य महत्त्वं ज्ञातवान् ।

**(iv)** लज्जया सः बालः मित्राणां दृष्टिपथं परिहरन् एकाकी एकम् उद्यानं प्राविशत् ।

**(v)** अन्ते कुक्कुरः अपि तस्य वचनं न अशृणोत् ।

**(vi)** भ्रान्तः कश्चन बालः पठनं परित्यज्य क्रीडितुम् अगच्छत् ।

**(vii)** विद्याग्रहणं कृत्वा सः बालः महतीं वैदुषीं प्रथां च प्राप्तवान् ।

**(viii)** परन्तु कार्यव्यस्ताः सर्वे तस्य वचनं न अशृण्वन् ।

*****